# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## प्रवेशपरीक्षा

## प्रथमपत्रिका

दिनाङ्कः - 06-09-2026      अङ्काः - 100

पूर्वाह्णे - 10:00 वादनतः 1:00 वादनपर्यन्तम्      समयः - घण्टात्रयम्

सूचना - सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि

**1. अष्टानाम् एकवाक्येन उत्तरं लिखत । 8**

१. अभिनवशङ्कराः के ?

२. लक्ष्मणसूरिः कस्मिन् ग्रामे जन्म लेभे ?

३. गुरूपदेशः पुरुषाणां कीदृशं स्नानम् ?

४. निपुणिका का ?

५. कस्मिन् शासति सति हरः समदृश्यत ?

६. स्थाण्वीश्वरस्य राजा कः ? तस्य कस्मिन् भगवति भक्तिरभूत् ?

७. अविनीतसम्पदः कीदृश्यः ?

८. रामः 'दिनकरकुलचन्द्र' इति कं सम्बोधयति ?

९. नागलोकस्वामी कः ?

१०. जामदग्न्यः कः ?

**2. षण्णां द्वित्रैः वाक्यैः उत्तरं लिखत । 12**

१. "कुमार! तथा प्रयतेथाः" कथम् ?

२. लवस्य अस्त्रप्रयोगसंहारपाटवं वीक्ष्य रामः किमवोचत् ?

३. श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीमहास्वामिनः कमलजदयितां किं किं दातुं प्रार्थयन्ते ?

४. सिद्धः जनान् कथमनुजग्राह ?

५. भैरवाचार्यो राजानमुपह्वरे किमवादीत् ?

६. परशुरामस्य अभिमतेन आशीर्वचनेन द्विगुणितभक्तिः भीष्मः किं निवेदयामास ?

७. सहिष्णुना कीदृशः शत्रुः उन्मूलयितुं सुकरः ?

८. समुद्रवेला कीदृशी अस्ति ?

**3. त्रयाणां सप्ताष्टैः वाक्यैः उत्तरं लिखत । 9**

१. युद्धान्निवारयन्तीं मातरं प्रति गाङ्गेयस्य सान्त्ववचनानि कानि ?

२. युधिष्ठिरेणोपदिष्टं क्रोधस्य परित्याज्यत्वमुपवर्णयत ।

३. उर्वशीं भरतमहर्षिः कुतः अशपत् ?

४. जीमूतवाहनस्य त्यागबुद्धिं वर्णयत ।

५. राजानः लक्ष्म्या सर्वाविनयाधिष्ठानतां कथं गच्छन्ति ?

**4. वाक्यत्रयं सप्रसङ्गं विवृणुत । 9**

१. नृपतिः प्रैक्षत सेवितुं गतः ।

२. स्वार्थालसाः परोपकारदक्षाश्च प्रकृतयो भवन्ति भव्यानाम् ।

३. शक्त एवाहं स्वयमेव सारथ्यं कर्तुं, प्रहर्तुं च ।

४. दिवसकरगतिरिव प्रकटितविविधसंक्रान्तिः ।

५. चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः ।

**5. पद्यद्वयं पूर्णं लिखत । 6**

१. स्पृहणीयगुणैः ........................... समुन्नतेः ॥

२. कर्मस्वात्मोचितेषु ........................... देहि मह्यम् ॥

३. मातः ........................... देहि मह्यम् ॥

**6. एकस्य पद्यस्य सान्वयम् अर्थं लिखत । 4**

१. श्रुतमप्यधिगम्य ये रिपून् विनयन्ते न शरीरजन्मनः ।
जनयन्त्यचिराय सम्पदामयशस्ते खलु चापलाश्रयम् ॥

२. नमते धरणीभृते वरं तनयं वंशकरं प्रसादयन् ।
स्मयमानमुखाम्बुजो हरो मिषतस्तस्य पुरस्तिरोदधे ॥

**7. एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत । 4**

१. बाणभट्टः    २. भारविः

**8. चतुर्णां रूपाणि परिचाययत । 4**

१. विनयप्रमाथिनः    २. शस्त्राशस्त्रि    ३. सहसा
४. बालिशतया    ५. सद्म    ६. अवधार्य

**9. चत्वारि पदानि वाक्ये योजयत । 4**

१. गृहाण    २. जिगमिषुः    ३. धनुः
४. मस्करी    ५. आपदाम्    ६. दत्त्वा

**10. चतुर्णां पर्यायपदानि लिखत । 4**

१. वैधेयः    २. कुसुमशरः    ३. द्विरदः
४. गृध्नुः    ५. रोधः    ६. क्षपा

**11. चतुर्णां सन्धिं विभज्य नाम लिखत । 6**

१. मास्त्विवत्युपरुन्धन्तस्ते    २. तन्नास्त्यस्माकम्    ३. विद्युल्लता
४. करो जटाधरः    ५. प्रभवन्त्यभिमानशालिनाम्    ६. तन्त्रेऽस्मिन्

**12. चतुर्णाम् एकं पदं लिखत । 4**

१. वक्षसि उपवीतवत् धृतमाला    २. सुरराजः वाहनम्    ३. परीक्षितुम् इच्छा
४. यस्य स्फुटा वाक् नास्ति    ५. इन्द्रस्य सम्बन्धिनी    ६. युद्धविरामस्य कालः

**13. चतुर्णां व्याकरणविशेषं लिखत । 8**

१. कुप्यन्ति हितवादिने    २. विजयस्व    ३. सन्तमसम्
४. भगवते रोचते    ५. अलमस्मै कर्मणे    ६. औपयिकः

**14. चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत । 8**

१. गुरुभक्ताः    २. चतुरश्रबुद्धिः    ३. दिव्यपद्यैः
४. तितिक्षासमम्    ५. अट्टहासनामा    ६. यथाकालम्

**15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत ।** **6**

१. अमन्यत २. प्रेक्षिष्यते ३. उपयातु ४. बभूव

**16. चतुर्णां रिक्तस्थानानि पूरयत ।** **4**

१. कुरुते ________________ इवार्थदर्शनम् ।

२. उपकृतं खलु ________________ ।

३. स्वतःप्रकाशानि ________________ अस्त्राणि ।

४. तेषाममी तुहिनशैलरुचः ________________ ।

५. वृत्तिसारूप्यं ________________ नियतमेव ।

------------------------